वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

भारतीयव्याकरणपरम्परायामयोगवाहविचारः

डॉ. कालिन्दी शुक्ल[१]

०. प्रातिशाख्यग्रन्थेषु पाणिनीयव्याकरणपरम्परायां शिक्षाग्रन्थेषु च **अयोगवाह** इति संज्ञाविशेषेण प्रयुक्तानां वा संज्ञाविशेषं विना प्रयुक्तानां **अनुस्वारजिह्वामूलीयोपध्मानीयविसर्जनीया-नुनासिक्ययमानां** या शास्त्रीयविचारणा वर्तते तस्या अध्ययनमस्मिन् शोधलेखे प्रस्तूयते।

१. पाणिनिरष्टाध्याय्यां संस्कृतभाषाया व्याकरणं सूत्रशैल्या अवर्णयन्। प्रारम्भ एव चतुर्दशसूत्रेषु वर्णसमाम्नायमुपदिशति स्म[२]। पाणिनिना[३] वर्णसमाम्नाये वैज्ञानिकक्रमेण वर्णोपदेशः कृतोऽस्ति। तद्यथा समानाक्षराणि सन्ध्यक्षराण्यन्तःस्थास्स्पर्शोष्मव्यञ्जनानि च। एकैकस्य सूत्रस्यान्तेऽनुबन्धमुपयुज्य प्रत्याहारानरचयत्। येन लाघवेन शास्त्रप्रवृत्तिर्सम्भवति[४]। एतानि सूत्राणि माहेश्वराणि सूत्राणि शिवसूत्राणि वा इति नाम्नाऽपि प्रख्यातानि वर्तन्ते[५]। संस्कृतभाषाया द्विचत्वारिंशद्वर्णा माहेश्वरसूत्रेषु पाणिनिना उपदिष्टास्सन्ति तत्र सस्वराणां दीर्घप्लुतभेदान् न उपदिशति स्म। किन्तु सोऽष्टाध्याय्यां **अणुदित्सवर्णस्य चाप्रत्ययः।** इत्यनेन सवर्णग्राहकसूत्रेणानुपदिष्टानां दीर्घप्लुतादिभेदानां ग्रहणकव्यवस्थां चकार। भाषायां सभेदस्वरेभ्यः व्यञ्जनेभ्यश्चान्ये ध्वनयोऽपि श्रवणपथमायान्ति। तद्यथा विसर्जनीयजिह्वामूलीयोपध्मानीयय-मानुस्वारनासिक्याः। पाणिनिना एते ध्वनयो वर्णसमाम्नाये नोपदिष्टाः। ग्रहणकशास्त्रेणापि एतेषां ग्रहणकव्यवस्था कृता नास्ति। यदि सूत्रस्वरूपो वर्णोपदेशः साधुत्वबोधनार्थं प्रत्याहारसिद्धया च लाघवपूर्णशास्त्रप्रवृत्तये एवास्ति तर्हि तु वर्णसमाम्नाये एतेषान्ध्वनीनामुपदेशः कार्यैव इत्यनेन गृहीतेन महाभाष्यकारो हयवरट् सूत्रभाष्ये प्रयोजनवार्तिकस्युद्भावनां करोति। तद्यथा –**इदं विचार्यते।**

---

१ एसोसीएट प्रोफेसर, एस.वी.आर्ट्स कोलेज,अमदावाद, Email- kalindis1@gmail.com, (M) 9924518300

२ अइउण्। ऋलृक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठचटतव्। कपय्। शषसर्। हल्।

३ Cardona 1980: 160:1.3.4 “Authorship of the śiva-sūtras,Pāṇini – A survey of Research.”

४ अथ किमर्थो वर्णानामुपदेशः। प्रत्याहारार्थः। प्रत्याहारो लाघवेन शास्त्रप्रवृत्यर्थः। अथ प्रत्याहाराः। (काशिकावृत्तिः। प्रथमो भागः पृ. १)

५ इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि.....। सिद्धान्तकौमुदी
नृत्तावसाने नटराजराजौ ननाद ढक्कां नवपञ्चवारम्।
उद्दर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥ (नन्दीकेश्वरकृतकाशिकायां चतुर्दशसूत्रीविवृत्ति)।

इमेऽयोगवाहाः न क्वचिदुपदिश्यन्ते श्रूयन्ते च तेषां कार्यार्थ उपदेशः कर्तव्यः। के पुनरयोगवाहाः। विसर्जनीयजिह्वामूलीयोपध्मानी-यानुस्वारानुनासिक्ययमाः[६] **।**

१.१ एतेषां विसर्जनीयादीनान्ध्वनीनाम् **अयोगवाह** इति शब्देन व्यवहारस्य प्रयोजनमित्थं प्रतिपादयति **यदयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते।** विधानस्यास्य फलितार्थैतत्यदेते ध्वनयो वर्णसमाम्नाये पठिता न सन्ति। ग्रहणकसूत्रेणापि तेषां बोधो न भवति। उभयेष्वनुपदिष्टत्वेन प्रत्याहारैरप्ययोग-वाहानाम्प्रत्यायनं न सम्भवति[७]। तथापि वाग्व्यवहारे प्रयुज्यन्ते श्रूयन्ते च[८]। योगं न वहन्तीत्ययोगवाहाः। न योगवाहा इत्ययोगवाहाः। अर्थात् येषां ध्वनीनां वर्णसमाम्नाये योगोपदेशो नास्ति किन्तु शास्त्रेषु प्रयोगो दृश्यते तेऽयोगवाहाः। उद्योते नागेशच्छायाव्याख्यायां मन्नदेवगुरुश्चास्मिन्नेवार्थेऽयोगवाहसंज्ञायारन्वर्थताम्प्रति-पादयति[९]। इत्थं महाभाष्यकारो विसर्जनीय-जिह्वामूलीयोपध्मानीयानुस्वारानुनासिक्ययमानाम्बोधनाय **अयोगवाह** इति संज्ञाया व्यवहारः केवलमष्टाध्याय्या वर्णोपदेशम्प्रत्याहाराञ्चानुलक्ष्यैवाकरोत्।

१.१.१ प्रातिशाख्येषु शिक्षाग्रन्थेषु पाणिनीयापाणिनीय व्याकरणेषु च विसर्जनीयादीनां ध्वनीनामुपदेशोऽस्ति। तत्रापि केचनाचार्याः तेषां बोधनाय **अयोगवाह** इति संज्ञां प्रयुक्तवन्तस्सन्ति[१०]। ऋक्तन्त्रे वाजसनेयिप्रातिशाख्ये च स्वरव्यञ्जनानामुपदेशानन्तरमयोगवाहानामुपदेशोऽस्ति[११]। ऋक्तन्त्रे तु व्यञ्जनानां कृते **योगवाह** इति संज्ञा प्रयुक्तास्ति[१२] प्रत्याहारसिद्धये च वर्णोपदेशो वर्तते[१३]। किन्तु ऋक्तन्त्रे

---

[६] हयवरट्।....पूर्वोपदेशे कित्वप्रतिषेधो व्यलोपवचनं च। वार्तिकभाष्यम्। (व्याकरणमहाभाष्यम्।प्रथमो भागः) एफ कीलहोर्न (पृ. २८,२९)

[७] अनुपदिष्टाश्च अयुक्ताःप्रत्याहारलक्षणेन पाठाभावादसंबद्धा इत्यर्थः। उपदेशो द्विविधः पाठः ग्रहणकशास्त्रेण प्रत्यायनं च। स द्विविधोऽप्येषां नास्तीत्यर्थः। हयवरट्॥ ६ ॥ भाष्यप्रदीप। (व्याकरणमहाभाष्यम्।प्रथमो भागः, पृ. १२७)

[८] श्रूयन्ते चेति॥ प्रयोगे विसर्जनीयस्य स इत्यादिसूत्रेषु चेति भावः। भाष्यप्रदीपोद्योते छायाव्याख्या। व्याकरणमहाभाष्यम्। (प्रथमो भागः)। (पृ. १२७)

[९] १ अतोऽयुक्ता इत्यर्थः। एवं च अक्षरसमाम्नायेषुऽयुक्ता सन्तो वहन्ति=प्रयोगं निर्वाहयन्तीत्ययोगवाहपदव्युत्पत्तिर्दर्शिता। हयवरट्॥ ६ भाष्यप्रदीपोद्योतः। व्याकरणमहाभाष्यम्। (प्रथमो भागः)। (पृ. १२७, १२८.)

२ न विद्यते योगः सम्बन्धो येषां समाम्नाये तेऽयोगाः। वहन्ति ते वाहाः, अयोगाश्च ते वाहाश्चेति बोध्यः। हयवरट् सूत्रभाष्ये भाष्यप्रदीपोद्योते छाया व्याख्या। व्याकरणमहाभाष्यम्। (प्रथमो भागः)। (पृ. १२७, १२८)

[१०] वाजसनेयि प्रातिशाख्यमृकतन्त्रव्याकरणमहाभाष्यम्पाणिनीयशिक्षाः इत्येतेषां ग्रन्थकर्तारा:।

[११] १ अथायोगवाहाः। अः इति विसर्जनीयः।" ×क इति जिह्वामूलीयः। ×प इत्युपध्मानीयः। हुमित्यनुनासिकः। अथ यमाः कुं इति खुं इति गुं इति घुमिति यमाः। अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः। अथानुस्वारौ अं आं त्यनुस्वारौ॥ १.२ ऋक्तन्त्रम्। (पृ.-२)

२ अथायोगवाहाः॥ १८॥ ×क इति जिह्वामूलीयः॥ १९॥ ×प इत्युपध्मानीयः॥ २०॥ अं इत्यनुस्वारः॥ २१॥ अः इति विसर्जनीयः॥ २२॥ हुँ इति नासिक्यः॥ २३॥ कुँ खुँ गुँ घुँ इति यमाः॥ २४॥ वाजसनेयि प्रातिशाख्यम्। (८.१ तः २४ पर्यन्तम्)।

[१२] २.७ तः ११ पर्यन्तम्। ऋक्तन्त्रम्। (पृ. २।

[१३] प्रत्याहारार्थो वर्णोऽनुबन्धो व्यञ्जनं यावतिथस्तावतां तदादीनां ततः पराणाम्॥ ऋकतन्त्रम् १.३।

प्रत्याहारप्रयोगो न दृश्यते[१४]। ऋक्तन्त्रवाजसनेयिप्रातिशाख्ययोर्वर्णसमाम्नाययोः विसर्जनीय-जिह्वामूलीयोपध्मानीया-नुस्वारनासिक्ययमोपदिष्टाः सन्तोऽ**योगवाहः** शब्देनाख्यां प्रतिपाद्यन्ते। महाभाष्यकारेणाष्टाध्याय्या वर्णसमाम्नायम्प्रत्याहाराञ्चनुलक्ष्यैव **यदयुक्ता वहन्ति नोपदिष्टाश्च श्रूयन्ते** इत्यस्मिन्नर्थे कृता **अयोगवाह** इति संज्ञात्र प्रातिशाख्येऽचरितार्थाः। अतो विसर्जनीयादीनां संज्ञिनां स्वरूपवैशिष्ट्यस्य मीमांसयैव तदर्थे प्रयुक्तो **अयोगवाह** इति संज्ञाया अन्वर्थकत्वं परीक्षणीयम्।

१.२ अयोगवाहसंज्ञायास्सम्यग्बोधनाय योगवाहसंज्ञा सुष्ठु ज्ञातव्यैव। कौण्डिन्नायन शिक्षाकारः संज्ञायास्स्वरूपमधिकृत्यैवायोगवाहसंज्ञायार्व्याख्यानं करोति[१५]। पतञ्जलेर्मतानुसारं **नोपदिष्टास्सन् श्रूयमाणा अयोगवाहा** इत्यनेन फलति यदु**पदिष्टाश्च श्रूयमाणा योगवाहाः**। कातन्त्रव्याकरणेऽस्मिन्नेवार्थे विसर्जनीयानुस्वारौ योगवाहौ उच्येते। यतः कातन्त्रव्याकरणेऽमू स्वरव्यञ्जनाभ्यां सहैवोपदिष्टौ स्तः[१६]। ऋक्तन्त्रे कादयो सान्तार्योगवाहशब्देनाख्यास्सन्ति। ऋक्तन्त्रेवाजसनेयिप्रातिशाख्ये च विसर्जनीयजिह्वामूलीयोपध्मानीययमानुस्वारनासिक्योपदिष्टा सन्तो **अयोगवाहा** उच्यन्ते। इत्थमनुपदिष्टाश्च श्रूयन्ते इत्ययोगवाहोपदिष्टाश्च श्रूयन्ते इति योगवाहा इत्यवबोधो न युज्यते। अतो योगवाहपदेन बोध्यः संज्ञायाः स्वरूपं सुष्ठु ज्ञेयम्[१७]।

१.२.१ कौण्डिन्नायनशिक्षायां योगवाहपदेनाख्यातानां संज्ञीनां स्वरूपमित्थं निरूपितमस्ति। तद्यथा **व्यञ्जनेषु मध्ये यानि व्यञ्जनानिस्वपूर्ववर्तिनः स्वरस्याङ्गताङ्गच्छन्त्यपि स्वपरवर्तिनः स्वरस्यापि अङ्गानि भवितुं शक्नुवन्ति तानि व्यञ्जनानि योगवाहा इत्युच्यन्ते। योगेन स्वेन सह युक्तेन स्वरेण सह सर्वथा तत्परवशतया ततः पूर्वं पश्चाद् वा वहन्ति गच्छन्तीति योगवाहाः। योगवाहिन इत्यर्थः। योगवाहा चाऽस्मत्प्रोक्तवर्णसमाम्नायस्थाः कादयो हान्ता वर्णा बोध्याः। इत्थं कादयो हान्ता अर्थात् स्पर्शान्तस्थोष्मव्यञ्जनानि स्वरूपवैशिष्ट्येनैव योगवाहोच्यते न तूपदिष्टत्वातच्छ्रूयमाणत्वेन योगवाहाः।** एवम् रीत्या **अयोगवाह** इति संज्ञापि बोध्यमानानां संज्ञीनां स्वरूपमनुलक्ष्यैव चारितार्थ्यमवाप्नोति[१८]।

---

[१४] *यावतिथः....पराणाम् ----- we do not find anypratyāhār in Ṛktantra. ऋक्तन्त्रम्। (सूर्यकान्तकृता टिप्पणी ३.५। पृ.७)।*

[१५] *योगवाहाः तथाऽयोगवाहा इति क्रमात् द्विधा। वर्गयोः प्रविभज्यन्ते व्यञ्जनानि तु शिक्षकैः॥ कौण्डिन्नायन शिक्षा १०९॥*

[१६] *वर्णसमाम्नाये क्रमपंरिपठितयोरनुस्वारविसर्जनीययोः व्यस्तसंज्ञाविधानमे आभ्यां सह स्वरव्यञ्जनयोरभिन्नसन्निकृष्टत्वाविभावार्थम्। एवं सत्यमी इह योगवाहा एवोच्यन्ते। प्रत्याहारवादिनः पुनराहुः – अयोगवाह इति। कथं पुनरयोगवाहाः। अयुक्ता वहन्ति अनुपदिष्टाश्च श्रूयन्ते। दूर्गटीका। (कातन्त्र व्याकरणम् १.१.९)।*

[१७] *व्यञ्जनानि तु यानि स्युरपि स्वपरवर्तिनः। स्वरस्याङ्गानि तान्येव योगवाहा इति स्मृताः॥ कौण्डिन्नायन शिक्षा ११०॥*

[१८] *स्वपूर्ववर्तिनो यानि स्वरस्याङ्गानि सर्वदा। व्यञ्जनानि तु तान्येवाऽयोगवाहाः प्रकीर्तिताः॥ कौण्डिन्नायन शिक्षा १११।*

१.२.२ यानि व्यञ्जनानि सदैव स्वपूर्ववर्तिन एव स्वरस्याङ्गानि भवन्ति स्वपरवर्तिनस्स्वरस्याङ्गानि भवितुं कर्ह्यपि न शक्नुवन्ति तानि व्यञ्जनानि अयोगवाहा उच्यन्ते। किन्तु विसर्जनीयादिषु ध्वनिषु केचन ध्वनयः पूर्वस्वरस्याङ्गानि न भवन्ति[१९]। इत्थमेते ध्वनय अपि उपर्युक्तलक्षणानुसारमयोगवाहा न सन्ति एवञ्चातिव्याप्तिदोषग्रस्तमेतल्लक्षणम्। अनुस्वारविसर्जनीयौ चानुलक्ष्यैव व्याख्या प्रस्तुता कौण्डिन्नायनशिक्षाकारेण तद्यथा प्रधानतयोर्विसर्गानुस्वारयोर्वर्णसमाम्नायेष्वादितोऽकारयोगेनु पदिश्यमानत्वात्तयोः **अयोगेन वहतः स्वरूपं निर्वहतः** इति **अयोगवाह** इति व्यवहारः। इदं लक्षणं जिह्वामूलीयोपध्मानीययमनासिक्यान्विषये अचरितार्थं भवति तेनेदं लक्षणमप्यव्याप्तिदोषग्रस्तम्।

१.२.३ वाजसनेयिप्रातिशाख्ये स्वरव्यञ्जनानन्तरमयोगवाहानामुपदेशोऽस्ति। वर्णसमाम्नायस्यान्ते च अष्टम अध्याये च प्रातिशाख्यकारो वर्णगणनां प्रस्तौति। तद्यथा **एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाचः। (१.२५) त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः। द्विचत्वारिंशद् व्यञ्जनान्येतावान्वर्णसंग्रहः। (८.३८)** स्वरव्यञ्जनात्मक ब्रह्मराशिषु अयोगवाहाः परिगणिता न सन्ति तस्मात्ते स्वरव्यञ्जनेभ्य भिन्नाः किन्तु अकारादिभिर्ध्वनिभिश्श्रुतिविशेषात्मलाभं वहन्तीत्यस्मिन्नर्थे उवटो वाजसनेयि-प्रातिशाख्येऽयोगवाहशब्दस्य व्युत्पत्तिं प्रस्तौति। तद्यथा **अकारादिना वर्णसमाम्नायेन सहिता सन्तः एते आत्मलाभं प्राप्नुवन्तीत्ययोगवाहाः[२०]।**

२ ऋग्वेदप्रातिशाख्ये वर्णोपदेशो नैवास्ति[२१]। किन्तु, विष्णुमित्रकृतायां वर्गद्वयवृत्त्यां वर्णमालाया उपदेशो वर्तते। तत्र स्वरव्यञ्जनानन्तरं **अः ᳵक ᳶप अं** इत्येतेषां ध्वनीनां लिपिसहितं किन्तु विसर्जनीयादिसंज्ञारहितञ्चोपदेशः कृतो वर्तते[२२]। अत्र यमनासिक्यावुपदिष्टौ न स्तः। तौ तु शास्त्रे यथाक्रमेण ध्वन्यागमपटल उच्चारणदोषपटले च निर्दिष्टौ स्तः। तैत्तिरीयप्रातिशाख्येऽपि अथ वर्णसमाम्नायः इति प्रथमं सूत्रम्। किन्तु तत्र भाष्यकारः तैत्तिरीयशाखायां प्रचलितध्वनीनां परिगणनं करोति।

---

[१९] १ वासशब्दादनुस्वारः पूर्वस्याङ्गं न काठके। सर्वसम्मतशिक्षा ३८। (परिशिष्ट कौण्डिन्नायन शिक्षा। पृ. ८२५)
२ नासिक्या न खलु पूर्वस्य स्वरस्याङ्गानि भवन्ति॥ तैत्तिरीय प्रातिशाख्यम् २.१.८।

[२०] अथाऽयोगवाहाः। उवटभाष्यम्। (वाजसनेयि प्रातिशाख्यम् ८.१८)। (पृ. ३८८, ३८९)

[२१] ननु कथं वर्णसमाम्नायमनुपदिश्यैव "अष्टौ समानाक्षराण्यादितः" इति। ... नैषः दोषः उपदिष्टो वर्णसमाम्नायो विद्यते। तत्र यावन्तो वर्णा अस्यां शाखायामुपयोक्ष्यन्ते तावतां संज्ञां कर्तुं तमेव वर्णसमाम्सायमुररीकृत्याह-"अष्टौ समानाक्षराण्यादितः"। .... सोऽयमाचार्यप्रवृत्या पाठक्रमोऽनुमीयमानो लौकिकवर्णसमाम्नायस्य द्विधा पाठं गमयति। अतोऽयं लौकिको वर्णसमाम्नायो गृह्यते। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.३)। (पृ. ४४,४५.)

[२२] विष्णुमित्रकृतवर्गद्वयवृत्तिः। ऋग्वेदप्रातिशाख्यम् (पृ. ३१,३२)

२.१ शास्त्रान्वेषणेन ज्ञायते विभिन्नेषु ग्रन्थेष्वयोगवाहानां विषये वैमत्यमिति। पाणिनीय-व्याकरणपरम्परायां व्याकरणमहाभाष्ये विसर्जनीयजिह्वामूलीयोपध्मानीया-नुस्वारानुनासिक्ययमा वाजसनेयिप्रातिशाख्ये चानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः। ऋक्तन्त्रे च विसर्जनीयजिह्वामूलीयोपध्मानीयनु-नासिकयमानुस्वारौ इति षड्ध्वनयोऽयोगवाहसंज्ञयाभिहिता-स्सन्ति।

तैत्तिरीयप्रातिशाख्ये विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्येति पञ्च। ऋग्वेद-प्रातिशाख्ये अं अः ≍क≍प इति चत्वार अयोगवाहसंज्ञारहिताभिहिता ध्वनयस्सन्ति। योगवाह इति संज्ञाया उल्लेख ऋक्तन्त्रे कातन्त्रव्याकरणे च दृश्यते। ऋक्तन्त्रे व्यञ्जनानि योगवाहपदेन समाख्या सन्ति। कातन्त्रव्याकरणे तु अनुस्वारविसर्जनीयौ योगवाहौ। वेदानां विविधासु शाखासु प्रवर्तमानानां विसर्जनीय-जिह्वामूलीयोपध्मानीययमानुस्वारनासिक्यध्वनीनां प्रयोगस्वरूपो विभिन्नोऽस्ति। सर्वासु शाखासु नासिक्यं नास्ति। तेषां संख्याविषयेऽपि वैविध्यं वर्तते। महाभाष्यस्य विभिन्नेषु सम्पादनेषु **अनुनासिक्य आनुनासिक्य नासिक्यश्च** एते त्रयः पाठान्तरा विद्यन्ते।

३. इदानीं विचार्यते ध्वनीनामभ्यासेनैव तेषां स्वरूपज्ञानं भवति।

३.१ **<u>यमः</u>।**

एषो यमसंज्ञको वर्णो वेदेषु प्रसिद्धः। व्याकरणग्रन्थेषु प्रातिशाख्यग्रन्थेषु शिक्षाग्रन्थेषु च यमस्य स्वरूपादिविषये विस्तृतं विवरणं कृतमाचार्यैः।

३.१.१ सिद्धान्तकौमुद्यां भट्टोजिदीक्षितो यमस्य व्याख्यां प्रस्तौति **वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः। पलिक् क् नी। चख् ख् नतुः। अग् ग् निः। ध् ध् न्तीत्यत्र क्रमेण क-ख-ग-घेभ्यःपरे तत्सदृशा एव यमाः॥** व्याख्यानेनानेन यद् भट्टोजिदीक्षितस्य मतेन यमो आगम इति। **सदृशौ द्वौ वर्णौ** (तत्पञ्चमे परे) इत्यस्मिन्नर्थे **यम** इति संज्ञा आन्वर्थिकी। पाणिनीयशिक्षायां पञ्जिकाभाष्यकार **यच्छन्तीति यमाः। स्वयमेवोपरमेरन्**। इति प्रकारेण यमश्शब्दस्यान्वर्थक्यं प्रतिपादयति।

तैत्तिरीयप्रातिशाख्ये **नासिक्यः** इति शब्द यमस्य पर्यायरूपेण प्रयुक्तो वर्तते[२३]। **स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान्नासिक्याः॥ (२१.१२)** नासिक्यविधायकसूत्रे पदक्रमसदनभाष्येन

[२३] *तान्यमान्येके॥ तैत्तिरीयप्रातिशाख्यम् २१.१३।*

तैत्तिरीयशाखायां यमो आगमात्मक इति[२४]। तैत्तिरीयप्रातिशाख्ये नासिक्यः पूर्वस्वरस्याङ्गं न भवति[२५]। वाजसनेयिप्रातिशाख्ये **विच्छेद** इति संज्ञा यमस्य पर्यायत्वेन प्रयुक्तास्ति। **अन्तःपदेऽपञ्चमःपञ्चमेषु विच्छेदम्। (४.१६३)** इत्यस्य सूत्रभाष्यानुसारेण **रुक्म**पदे **क** कारस्य द्विर्भावे प्राप्ते विच्छेदमापद्यते। उवटभाष्येन ज्ञायते यद्वाजसनेयिप्रातिशाख्ये **विच्छेद (यमः)** आगमात्मकोऽस्ति[२६]। ऋक्तन्त्रेऽपि सूत्रकारो यमस्य स्वरूपमित्थं निरूपयति **अनन्त्यान्त्यसंयोगे मध्ये यमे पूर्वगुणः। (१.२)** भट्टोजिदीक्षितः शब्दकौस्तुभे **पूर्वगुण इति** पदस्यार्थः **पूर्वभक्त** इति प्रतिपादयन् यममागमात्मकं मन्यते[२७]। अथर्वप्रतिशाख्येऽपि यमानामुपदेशोऽस्ति।**तमौ। यथास्थानं यमः। (३.१.३६) गमौ। यथास्थानं यमः। (३.१.३७) कनौ। यथास्थानं यमः। (३.१.३८) पनौ। यथास्थानं यमः। (३.१.३८)** श्रीसूर्यकान्तमहाभागः यमानागमत्वेन प्रतिपादयति[२८]।

पाणिनीयशिक्षाकारो वर्णसमाम्नाये त्रिषष्टिर्चतुर्षष्टिर्वा वर्णानां परिगणनां प्रस्तौति। यत्र चत्वारो यमाः परिगणिताः[२९] सन्तः शब्दकौस्तुभकारो यमस्य वर्णान्तरत्वेन प्रतिपादनं करोति[३०]।

३.१.२ ऋग्वेदप्रातिशाख्ये यमस्वरूपविषये विस्तृतं विवरणं वर्तते। तत्र **स्पर्शा यमानुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेषु।(ऋ.प्रा.६.२९)**इति यमविधायकं सूत्रमस्ति। सूत्रस्यास्य भाष्ये उवटो यमस्वरूपमित्थं स्पष्टीकरोति। तद्यथा **अनुनासिकाः स्पर्शाःस्वान्यमानापद्यन्ते अनुनासिकेषु स्पर्शेषु परेषु।** विधानेनानेन ऋग्वेदप्रातिशाख्ये यमो वर्णागमो नास्ति किन्तु वर्णापत्तिरस्तीति। पाणिनीयशिक्षायाः पञ्जिकाभाष्येऽपि

---

[२४] अनुत्तमात् स्पर्शात् उत्तमपरादानुपूर्व्येण नासिक्यानागमो भवति। द्वितीयस्पर्शाद् द्वितीय नासिक्याः, तृतीयस्पर्शात्तृतीय नासिक्याः, चतुर्थस्पर्शाच्चतुर्थाः ॥ माहिषेयकृत पदक्रमसदनभाष्यम्। (तैत्तिरीयप्रातिशाख्यम् २१.१२)।

[२५] नासिक्याः न खलु पूर्वस्वरस्याङ्गानि भवन्ति। माहिषेयकृत पदक्रमसदन भाष्यम्। (तैत्तिरीयप्रातिशाख्यम्२१.८)। (पृ.३१८)

[२६] पदमध्ये अपञ्चमः स्पर्शः पञ्चमेषु स्पर्शेषु प्रत्ययेषु विच्छेदमापद्यते। विच्छेदो यम इति अर्थान्तरम्। रुक्म इत्यत्र स्वरात् संयोगादिः (वा ४.१०१) इत्यादिना ककारस्य द्विर्भावे कृतेऽनेन सूत्रेण द्वितीयस्य ककारस्य यम इत्ययं कार्यक्रमः क्रियते। यज्ञ इत्यत्र जकारयमौ ञकारस्य संयोगः। उवटभाष्यम्। (वाजसनेयि प्रातिशाख्यम् ४.१६३)।

[२७] पूर्वस्य गुण इतिपूर्वभक्त इत्यर्थः एतेनागमत्वं स्फुटीकरोति। शब्दकौस्तुभः। (व्याकरणमहाभाष्यम् १.१.८)।

[२८] Suryakant 2008: 54:.....This treatment of yama is extremely meager. Yamas are transitional sounds, assumed to intervene between non-nasal and the following nasal as a kind of nasal counterpart of the non-nasal, and therefore called its yama are twin.(Atharva Prāiśākhya.172b).

[२९] .....चत्वारश्च यमाः स्मृताः ॥ पाणिनीयशिक्षा ४।

[३०] त्रिषष्टिश् चतुर्षष्टिर्वा वर्णाः सम्भवतो मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्वयंभुवा॥ स्वराविंशतिरेकश्च स्पर्शानां पंचविशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च‿क‿पौ चापि पराश्रयौ। दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव चेति। अत्र हि यमानां पृथग्गणनात्स्पष्टमेववर्णान्तरत्वम्॥ शब्दकौस्तुभः। (व्याकरणमहाभाष्यम् १.१.८)। (पृ. २४७)।

मतस्यास्य नारदौदव्रज्योर्मतेन समर्थनं निरूपितमस्ति। तद्यथा- "**यमो वर्णागम इति विधीयते। ... अन्ये तु यमं वर्णापत्तिं मन्यन्ते। तथा च शौनकः –स्पर्शा यमानुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु।** पञ्जिकाउवटभाष्ययोरभिप्रायाननुसृत्य विद्वद्वर्यः श्रीमान् वीरेन्द्रकुमारवर्मा महाभागःस्वस्य मतं प्रस्तौति यत्तैत्तिरीयप्रातिशाख्ये वाजसनेयिप्रातिशाख्ये ऋक्तन्त्रे नारदीयशिक्षायाञ्च यथा यमो आगमात्मकोऽस्ति तथैव ऋग्वेदप्रातिशाख्ये यमो आगमात्मको नास्ति किन्त्वनुनासिकस्पर्शैव नासिक्यापत्तिं लभते[३१]। यमः प्रकृतिसदृशैव भवति[३२]। यमः स्वस्य प्रकृतिरूपव्यञ्जनैरभिन्नो वर्तते अर्थात्प्रकृतिमुद्दिश्य विहितानि शास्त्रीयकार्याणि यमेऽपि विधीयन्ते इत्थं यमे अननुनासिकस्पर्शस्य कार्याणि विधीयन्ते[३३]।

ऋग्वेदप्रातिशाख्यस्य **न स्पर्शयोष्मप्रकृतेः परस्ताद्यमापत्तिं। (६.३०)** सूत्रमुद्धृत्य भट्टोजि दीक्षितः शब्दकौस्तुभे प्रतिपादयति यदृग्वेदप्रातिशाख्येऽपि यमो वर्णान्तरमेवास्ति[३४]। किन्तु, शब्दकौस्तुभ उद्धृतं सूत्रं दोषग्रस्तमस्ति। वस्तुतस्तु **न स्पर्शयोष्मप्रकृतेः <u>प्रतीयाद्य</u>मापत्तिं। (६.३०)**इति सूत्रमस्ति शास्त्रे। तत्र तु **<u>प्रतीयात्</u>** इति पाठोऽस्ति। **<u>परस्तात्</u>** इति पाठो नास्ति। अतः शब्दकौस्तुभकारस्य मतस्य निरसनं भवति। शास्त्रेऽस्मिननुनासिकाः स्पर्शैव यमानापद्यन्ते।

३.१.३ उच्चारणस्थानम्।

प्रातिशाख्यानाञ्च शिक्षाग्रन्थानाञ्च व्याकरग्रन्थानाञ्चानुसारैः यमो नासिक्यध्वनिः वर्तते[३५]। ऋग्वेदप्रातिशाख्यानुसारं प्रकृतिरूपस्पर्शस्योच्चारणस्थानसदृशैव यमस्योच्चारणस्थानं भवति[३६]। यमो

---

[३१] ऋग्वेदप्रातिशाख्य-एक परिशीलन। डॉ.वीरेन्द्रकुमार वर्मा। (पृ. ७५,७६)

[३२] यमः प्रकृत्यैव सदृक्। ऋग्वेदप्रातिशाख्यम् ६.३२।

[३३] अनन्यस्तु प्रकृतेः प्रत्ययार्थे वेदितव्यः। प्रत्ययार्थे किमुक्तं भवति ? यमःप्रकृत्याश्रयाणि कार्याणि लभते इत्यर्थः। तस्मात् – उपद्मातेव धमति इत्यत्र सोष्मा तु पूर्वेण सहोच्यते सकृत् (६.२) इति दकारेण सहोच्यते यमः। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् ६.३४)। (पृ. ४१३)।

[३४] अत एव प्रातिशाख्ये स्पर्शा यमानुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेष्वप्युपक्रम्य प्रदोधुवच्छ्नश्रुष्वित्यत्र यमं निषेब्धुमारब्धेन स्पर्शयोष्मप्रकृतेः परस्ताद्यमापत्तिमिति सूत्रे परस्ताच्छब्दःप्रयुक्तः। यमःपर्कृत्यैव सदृक् श्रुति र्वा यमेन मुख्यास्ति। समानकालेत्यादि सूत्रान्तरेष्वपि स्पष्टमेव यमस्य वर्णान्तरत्वम्॥ शब्दकौस्तुभः। (व्याकरणमहाभाष्यम् १.१.८)। (पृ. २४६)।

[३५] नासिक्ययमानुस्वारान्। १.४८ ऋग्वेदप्रातिशाख्यम्। नासिक्या नासिकास्थानाः। २.४९ तैत्तिरीय प्रातिशाख्यम्। नासिकामूलेन यमाः। १.८२ वाजसनेयि प्रातिशाख्यम्। नासिकायां यमानुस्वारनासिक्याः। २.२.१२ ऋक्तन्त्रम्। अनुस्वारयमानां च नासिकास्थानमुच्यते। २२ पाणिनीय शिक्षा।

[३६] कण्ठ्योऽकारः। (१.३८) इत्यतः आरभ्य यानि स्थानान्युक्तानि, अत्र=एषु स्थानेषु, (यमोपदेशः) यमानां स्थानोपदेशः कर्तव्यः नासिक्यास्तावत्सर्व एव यमा उक्ताः, द्वितीयं तु प्रकृत्याश्रयं यतस्थानं तदर्थमिदमुक्तम्। तच्च भवद्यथान्तरं भवति। पल्किनी (५.२.४ ऋ.सं.) इत्यत्र ककारसरूपो यमः,चख्नथुःइत्यत्र खकाररूपो यमः, जग्मतुः इत्यत्र गकारसरूपो यमः,जघ्नतुः इत्यत्र घकाररूपो यमः। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.५०)।

नासिक्यध्वनिर्वर्तते। केवलं ऋग्वेदप्रातिशाख्ये समानकाला मुखश्रुतिरपि वर्तते[३७]। इत्थं शास्त्रीयप्रमाणैः प्रतीयते यद्दग्वेदप्रातिशाख्य अनुनासिक स्पर्शानामेव नासिक्यापत्तिर्भवति। श्रीवीरेन्द्रकुमारवर्मामहाभागः मन्यते यद्दग्वेदप्रातिशाख्ये यमस्य नासिक्योच्चारणं तु पश्चाद्गामीसमीकरणया निष्पद्यते[३८]।

वाजसनेयिप्रातिशाख्येऽपि यमार्थे प्रयुक्तो **विच्छेद** इत्यन्वर्थसंज्ञयापि तस्योच्चारणस्वरूपं स्फुट्यते। कौण्डिन्नायनः शिक्षाकारः तस्योच्चारणवैशिष्ट्यपरकान्वर्थक्यमित्थं प्रतिपादयति यद् **यमानां मुखभवाश्रुतिर्न भवतीति तु तेषां शुक्लयजुर्वेदप्रातिशाख्ये विच्छेद इत्यनया अन्वर्थया संज्ञया व्यवहारादपि ज्ञायते। यमस्य मुखभवश्रुतेरभावादि हि तत्कालेन मुखभवयोः पूर्वोत्तरयोर्वर्णयोर्विच्छेद इव क्रियत इति तस्याः संज्ञाया अन्वर्थता बोध्या।** यम इति संज्ञायाम् अप्युच्चारणवैशिष्ट्यपरकं निर्वचनं प्रस्तौति **"यम्यन्ते मुखभवश्रुतिनिरोधेन निवर्त्यन्ते इति यमाः[३९]"** इत्थं यमसंज्ञाया आन्वर्थक्यं न तु **यमल** (twin) अर्थे किन्त्वन्यथा सिद्ध्यति। शास्त्रीयैः प्रमाणैः सिद्धं यद्वाजसनेयिप्रातिशाख्ये नासिक्यागम एव यमः[४०]। तैत्तिरीय प्रातिशाख्ये **नासिक्या नासिकास्थानाः (२.४९)** इति सूत्रेण यमाः शुद्धनासिकस्था एव वर्तन्ते। किन्तु **मुखनासिक्या वा (२.५०)** इत्यनेन केचन विद्वांसः मन्यन्ते यत् प्रकृतिसदृशानां यमानां उच्चारणस्थानं मुखनासिका अस्ति। (याज्ञवल्क्यशिक्षायां यमस्वरूपं **अशरीरं** इति पदेन वर्णितमस्ति। अत्र यमस्य अशरीरस्वरूपं तस्य नासिक्योच्चारणं निर्दिशति[४१]।) किन्तु, भट्टोजिदीक्षित शब्दकौस्तुभे **अशरीरं** पदमित्थं बोधयति। तद्यथा **अशरीरमिति स्वररभक्त्यादिवद्व्यञ्जकलिपिविशेषशून्यमित्यर्थः।** लक्षणवशेनैव तदीयस्थलविशेषनिश्चयसंभवात् लिपिसंप्रदायप्रवर्त्तकाचार्य्यै स्वरभक्तेरिव यमस्यापि व्यञ्जकीभूता लिपिर्न कल्पितेत्यर्थः[४२]।

इत्थं शास्त्रीयैरभिप्रायैर्फलति यत्तैत्तिरीयप्रातिशाख्ये वाजसनेयिप्रातिशाख्ये ऋक्तन्त्रे पाणिनीयव्याकरणे च यमो आगमात्मकःशुद्धनासिक्यश्च वर्तते।

---

[३७] *श्रुतिर्वायमेन मुख्यास्ति समानकाला।....वा अथवा (यमेन =) यमोच्चारणेन, समानकाला, (मुख्या=) मुखे भवा श्रुतिः अस्ति यया यमस्तद्रूपो लक्ष्यते। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् ६.३३)। (पृ. ४१३)।*

[३८] *ऋग्वेदप्रातिशाख्य-एक परिशीलन। डॉ.वीरेन्द्रकुमार वर्मा। (पृ. ७६,७७)*

[३९] *कौण्डिन्नायनशिक्षा। ८४ इत्यत्र उपवन्धानुबन्धः। (पृ. २३५)*

[४०] *द्रष्टव्या पादटीप -२५*

[४१] *अशरीरं यमं विद्यात्।..ततो यमस्य द्वियीयजकारप्रतिरूपकस्य प्रथमजकारसमसंख्यकत्वेन उच्चारणे नासिकयोरेवाऽन्तर्लीनत्वम्॥ इयमेवाऽशरीरिता यमस्य॥ शान्तिव्याख्या। (याज्ञवल्क्यशिक्षाया ९२)। (पृ. १५५)*

[४२] *व्याकरणमहाभाष्यम्। शब्दकौस्तुभः। (व्याकरणमहाभाष्यम् १.१.८)। (पृ. २४७)*

३.१.४ यमानां संख्याः। प्रातिशाख्येषु शिक्षाग्रन्थेषु पाणिनीयव्याकरणे च चतुर्विधार्यमाः परिगणिताः सन्ति। कुं खुं गुं घुं इति[४३]।

१. अघोषा अल्पप्राणाः-कुं-क च ट त प

२. अधोषा महाप्राणाः –खुं-ख छ ठ थ फ

३. सघोषा अल्पप्राणाः –गुं – ग ज ड द ब

४. सघोषा महाप्राणाः –घुं -घ झ ढ ध भ

ऋग्वेदप्रातिशाख्ये यमो आगमात्मको नास्ति। ऋग्वेदस्य शैशिरीयशाखायामनुनासिक स्पर्शप्रकृतिरेव नासिक्यमापद्यते प्रकृतिनां विंशतित्वाद्दक्पाठिनां विंशतिप्रकारा यमा वर्तन्ते[४४]। वस्तुतस्तु स्वरूपदृष्ट्या चतुर्विधैव सन्ति।

३.१.५ यमानां अङ्गत्वम्।

पाणिनीयव्याकरणे यमस्याङ्गत्ववैषयिकं व्याख्यानं न वर्तते। वाजसनेयिप्रातिशाख्यस्य याज्ञवल्क्यशिक्षायाश्च मतयोः यमः पूर्वस्वरस्याङ्गं भवति[४५]। यत्तु तैत्तिरीय प्रातिशाख्यानुसारं नासिक्यः पूर्वस्वरस्याङ्गं न भवति। पूर्वस्याङ्गप्रतिषेधेन ज्ञायते यत्सः परस्याङ्गं भवति[४६]। परस्याङ्गत्वेन ज्ञायते यत्तैत्तिरीयशाखायां यमो व्यञ्जनरूपोऽस्ति। ऋग्वेदप्रातिशाख्ये यमो व्यञ्जनरूपोऽस्ति[४७]।

३.५ संहितायां यमस्य बोधनाय विशेषं लिपिचिह्नं न वर्तते। केषुचिन्मुद्रणेषु यमा अर्धचन्द्राकृतियुक्तबिन्दुना वा केवलेन बिन्दुरूपाकृतिना वा निर्दिष्टास्सन्ति। आधुनिकैर्विद्वद्भिर्यमस्य निर्देशार्थमाधिकारिकलिपिचिह्ननिर्धारणं कर्तुं पार्यन्ते।

---

[४३] यमाश्चत्वारः प्रथमयमद्वितीययमादिभेदेन विभजनात्। अत एव कुं खुं गुं घुं इति यमचतुष्टयं नायसादावुदाहृतम्। कचटतपाः कुः.खफछठथफाःखुरित्यादि परिभाषामाश्रित्य तत्तदुत्तरस्याऽशरीरस्यापि कथञ्चित्प्रदर्शनतात्पर्यकं चेदमितिध्येयम्। शब्दकौस्तुभः। (व्याकरणमहाभाष्यम् १.१.८)। (पृ. २४७)

[४४] १. यम-प्रकृत्येव सदृक् इति विंशतिर्यमाबह्वृचानां भवन्ति, स्वरूपैश्चत्वार एव। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.५०)। (पृ. ७५)।

२. एवञ्च यस्माद्यमा नासिकास्थानाश्चत्वारः सन्तिविंशतिस्थानिनां सरूपा लक्ष्यन्ते। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् ६.३३)। (पृ. ४१३)

[४५] १ यमः पूर्वस्याङ्गं भवति। च शब्दात्पूर्ववर्णसहितः। उवटभाष्यम्। (वाजसनेयिप्रातिशाख्यम् १.१०३)। (पृ. ५५,५६) २ अपञ्चमैकपदे संयुक्तं पञ्चमाक्षरम्। उत्पद्यते यमस्तत्र सोऽङ्ग पूर्वाक्षरस्य हि॥ याज्ञवल्क्यशिक्षा ९५। (पृ. १६५)

[४६] १. नासिक्या न खलु पूर्वस्वरस्याङ्गानि भवन्ति। तैत्तिरीयप्रातिशाख्यम् २१.८।

२ ....पूर्वस्याङ्गप्रतिषेधात् परस्यैव तदङ्गमिति वेदितव्यम्। माहिषेयकृत पदक्रमसदनभाष्यम्। (तैत्तिरीय प्रातिशाख्यम् २१.७)।

[४७] सर्वः शेषो व्यञ्जनान्येव।...सर्वः शब्दो यमादीनां परिग्रहणार्थः। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.६)।

यमस्यायोगवाहत्वमित्थं सिद्ध्यति यद्वर्णस्वरूपाभावादेवाक्षरसमाम्नायेऽयुक्तेत्ययोगाः मुखस्थश्रुतिविशेषात्मलाभवाहनाच्च वाहाः। अयोगाश्च ते वाहा **अयोगवाहा** इत्यन्वर्थसंज्ञा यमानां विसर्गादिवत्।

३.२ हुँ इति नासिक्य अनुनासिक्यो वा।

३.२.१ पतञ्जलिर्**हयवरट्। (६)** इति माहेश्वरसूत्रभाष्येऽयोगवाहेष्वनुनासिक्यमपि परिगणयति[४८]। किन्तु अयोगवाहानामङ्घुशर्षुचोपदेशः कार्य इत्यस्मिन्सिद्धान्तभाष्येऽपि जिह्वामूलीयोपध्मानीय-विसर्जनीयानुस्वराणामेव विवरणं वर्तते। महाभाष्यस्य कस्मिंश्चित्सम्पादनेषु **नासिक्य** इति पाठान्तरो मुद्रितः[४९]। भट्टोजिदीक्षितोऽपि शब्दकौस्तुभ अयोगवाहेषु विसर्जनीयजिह्वामुलीयोपध्मानीया-नुस्वारयमानेव निर्दिशति। तत्र नासिक्यस्य वा अनुनासिकस्य निर्देशोऽयोगवाहेषु नास्ति[५०]। अतो भाष्यकारो नासिक्य वा अनुनासिक्यपदेन कस्य बोधं कारयति तन्न स्पष्टीभवति। प्रातिशाख्येष्वपि नासिक्यध्वनिविषये भिन्ना अभिप्रायाः प्रवर्तन्ते। महाभाष्यस्यैकस्मिन्सम्पादने **नासिक्यपदेन हुँ ग्राह्यमि**ति निर्देशो वर्तते[५१]।

३.२.२ वाजसनेयिप्रातिशाख्ये **हुँ** नासिक्यस्यायोगवाहेषु निर्देशोऽस्ति। सूत्रकारो ज्ञापयति यन्नासिक्यध्वनिर्माध्यन्दिनशाखायां नास्ति किन्तु काण्वशाखायां कदाचिद्भवेत्[५२]। नासिक्यस्योच्चारणस्थानं नासिका तस्य च करणमोष्ठ्यसदृशमेव[५३]। ऋग्वेदप्रातिशाख्यस्य **नासिक्ययमानुस्वारान्। (१.४८)** इति सूत्रस्योवटभाष्ये नासिक्यपदस्य पूर्वेऽनेकानि पाठान्तराणि लभ्यन्ते[५४]। एवञ्च **हुँ नासिक्य**स्य वर्णमालायां वा कस्मिंश्चित्सूत्रेऽपि निर्देशो नास्ति। किन्तु, उच्चारणदोषपटले यमदोषान्वर्णयन्सूत्रकारो **ऊष्माणं वा**

[४८] *।..हयवरट्। ६...विसर्जनीयजिह्वानूलीयोपध्मानीयानुस्वारानुनासिक्ययमाः। व्याकरणमहाभाष्यम्। प्रथमो भागः। (एफ. कीलहोर्न)। (पृ. २८)।*

[४९] *के पुनरयोगवाहाः?। विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः॥ व्याकरणनहाभाष्यम्। (सम्पादकः पं.नन्दकिशोर शास्त्री)। (पृ. १३२)।*

[५०] *हयवरट्।६...अनुपदिष्टत्वे उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः। ते च विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारयमा इति भाष्यम्। शब्दकौस्तुभः।व्याकरणनहाभाष्यम्। (सम्पादकःपं.नन्दकिशोर शास्त्री)। (पृ. १३३)।*

[५१] *नासिक्यपदेन 'हुँ' इति ऋक्शाखाप्रसिद्धं ग्राह्यम्। 'हुँ इति नासिक्यः' इति कात्यायनप्रातिशाख्यात्।हयवरट्। ६। इति माहेश्वरसूत्रे अयोगवाहनासिक्यविषये सम्पादकेन कृता टिप्पणी। व्याकरणमहाभाष्यम्। (सम्पादकःपण्डित नन्दकिशोर शास्त्री)। (पृ. १३२)*

[५२] *हुङ्कारो नासिक्यः। एते वर्णामाध्यन्दिनानां न सन्तीति भावः।...माध्यन्दिनानामिति ग्रहणात् काण्वादेर्न्निषेधः। अनन्तभट्टभाष्यम्। (वाजसनेयि प्रातिशाख्यम् ८.३९। (पृ. ३९४)*

[५३] *१.यमानुस्वारनासिक्यानां नासिके। वाजसनेयिप्रातिशाख्यम् १.७४। २.समानस्थानकरणा नासिकौष्ठ्या। वाजसनेयि प्रातिशाख्यम् १.८०*

[५४] *अत्र अनेके पाठान्तराः =(१) ँ ं इति नासिक्यः (२) ॐइति नासिक्यः (३) ं इति नासिक्यः। (४) ङञणनम इति नासिक्यः।ऋग्वेद प्रातिशाख्यम् –एक परिशीलन। डॉ. वीरेन्द्रकुमार वर्मा।*

घोषिणस्तत्प्रयत्नम्। (प्रा. **१४.३५)** इत्यनेन सूत्रेण **हुँ** इति नासिक्यं दोषत्वेन निरूपयति[५५]। कारणेनानेन विद्वद्वर्यः वीरेन्द्रकुमारवर्मामहाभागो **नासिक्ययमानुस्वारान्। (१.२८)** इति सूत्रस्य **नासिक्य** इति पदं नासिकयोच्चरितध्वनिरित्यस्मिन्नर्थे प्रतिपादयति। उवटभाष्यस्यार्थं विहाय सः सूत्रमन्यथा बोधयति यद्**यमानुस्वारौ नासिक्यौ ध्वनितौ स्तः** इति[५६]। ऋक्तन्त्रे **हुँमित्यनुनासिकः। (१.२)** इति सूत्रे **अनुनासिक** इति पदं ऋक्तन्त्रकारः प्रयोजयति। श्रीसूर्यकान्त महाभागो द्वौ पाठान्तरौ उद्धरति[५७]। हुँ इति **नासिक्य ऋक्शाखायां प्रसिद्धः (पादटीप. ५०)** इति वचनेन ऋक्तन्त्रोऽभिप्रेतः स्यान्न तु ऋग्वेदप्रातिशाख्यं कदाचिदपि।

तैत्तिरीयप्रातिशाख्ये **हकारान्नणमपरान्नासिक्यम्। (२१.१४) इत्यनेन हँ** कारस्यागमो विधीयते। तद्यथा अह्न इति पदे अह्हँनाम् च अपराह्ने इति पदे अपराह्हँनाम् ब्रह्म इति पदे ब्रह्हँम् च इति प्रकारेण हँ कारस्यागमो भवति। वैदिकाभरणकार **नासिकायां भवो वर्ण नासिक्य (२१.१४)** इत्यर्थे नासिक्य इति संज्ञां द्विधा बोधयति तद्यथा नासिकयोच्चरितो वर्णविशेषो वा **हँ** इति नासिक्यार्थे प्रयुक्तःपारिभाषिक संज्ञा[५८]। तैत्तिरीयप्रातिशाख्ये **न विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वार-नासिक्यानाम्। (१.१८)** इत्यस्मिन्सूत्रे **नासिक्य**स्य निर्देशोऽस्ति। इत्थं प्रतीयते यत्तैत्तिरीयप्रातिशाख्ये **नासिक्य**पदेन यमागमश्च **हँ** नासिक्यश्च निर्दिष्टौ स्यात्।

३.२.३ महाभाष्यस्य केषुचिन्मुद्रणेषु यत्र **अनुनासिक्य** इति पाठान्तरोऽपि दृश्यते। तत्रानुनासिक्यपदेनानुनासिकध्वनिरभिप्रेतः। **अत्रानुनासिकः पूर्वस्य तु वा। (८.३.२)** इति सूत्रेण विकल्पेनानुनासिक्याधिकारः प्रवर्तते। तत्र काशिकाकारः **सँस्कर्ता** इति पदमुदाहरति। अत्र **सँ** इति वर्णे यो अनुनासिको ध्वनिः स अभिप्रेतः। अनुस्वारानुनासिक्ययोर्मध्ये भेदो वर्तते। तत्तु **अनुनासिकात्परोऽनुस्वारः। (८.३.४)** इत्यनेन सूत्रेण ज्ञायते।

---

[५५] *घोषिण ऊष्मणोरक्तपरात्परम्; (तत्प्रयत्नम्=) तेन घोषिणा तुल्यप्रयत्नम् ऊष्माणं वा आहुर्यमम्।स दोषः। तं वर्जयेद् बुधः।ब्रह्म।अह्ना। उवटभाष्यम्।(ऋग्वेदप्रातिशाख्यम् १४.३५)। (पृ. ७३२)*

[५६] *ऋग्वेदप्रातिशाख्यम् -एक परिशीलन। वीरेन्द्रकुमार वर्मा। (पृ. ३९)*

[५७] *ँ नासिक्यः A.B.D हिमित्यनुनासिकम्। C.। पाठान्तराः पादटीपे। ऋक्तन्त्रम्१.२। एवं डॉ.सूर्यकान्तमहाभागःकृता टिप्पणी १२ (पृ. १०,११)*

[५८] *नासिक्या नासिकास्थानाः। प्रथमे पादटीपे सम्पादकीयविवरणम्। तैत्तिरीय प्रातिशीख्यम् २.४९। (पृ. ६९)*

३.२.४. सर्वेष्वपि प्रातिशाख्येष्वनुनासिकस्य विधानमस्ति[५९]। ऋक्तन्त्रे च ऋग्वेदप्रातिशाख्ये च तस्य **रक्त** इति संज्ञा विहितास्ति[६०]। किन्तु नैकेषु प्रातिशाख्येष्वनुनासिक्यस्यायोगवाहत्वेन निर्देशः कृतो वर्तते। तेन कारणेन तस्य विषये प्रातिशाख्येषु कृतं विवरणं प्रस्तुतं नास्ति।

३.३ अनुस्वारः।

३.३.१ **अं** इत्यनुस्वारो इत्येतस्य निर्देशोऽष्टाध्याय्यां पाणिनेरितरव्याकरणेषु प्रातिशाख्येषु शिक्षाग्रन्थेषु च वर्तते। **अनुस्वार** इति शब्द **अनु** उपसर्गपूर्वकः **स्वृ** धातोर्घञ् प्रत्ययस्य सम्मेलनेन निष्पद्यते। **अनुस्वार** इति अन्वर्थसंज्ञा वर्तते। **अनु** पश्चात् स्वरवर्णानन्तरं स्वर्यते उच्चार्यते इत्यनुस्वारः। पाणिनीयशिक्षायां पञ्जिकाभाष्यकारोऽपि **अनुस्वार** पदस्य निर्वचनमित्थं बोधयति यत् **स्वरमनुभवतीत्यनुस्वारः**। अनुस्वारसंज्ञया एव सूच्यते यदेष स्वरानुगामी ध्वनिः। पूर्ववर्तिनस्स्वराद्दते एतस्य ध्वनेश्रुति संभवो नास्ति। अनुस्वारः पराश्रितध्वतिरूच्यते[६१]। कातन्त्रव्याकरणानुसार-मनुस्वारस्य निर्वचनमित्थमस्ति। **अनु स्वर्यते संलीनं (भूत्वा) शब्द्यते इत्यनुस्वारः**[६२]।

३.३.२ **उच्चारणप्रकारः।**

अनुस्वार ऊष्मवर्णोऽस्ति। तस्य बाह्यप्रयत्नोऽघोषो भवति[६३]। एषो नासिकास्थानीयोऽस्ति[६४]।
तैत्तिरीयप्रातिशाख्येऽनुस्वार उत्तमस्पर्शानिवानुनासिकोऽस्ति[६५]। यो नासिकाविवरादुच्चार्यते एवञ्च तस्योच्चारणे हन्वोरूपसंहारो भवति[६६]।

३.३.३ **अनुस्वारस्याङ्गत्वम्।**

---

[५९] (१) तैत्तिरीय प्रातिशाख्यम्। १५.१ एवं ३ (२) वाजसनेयि प्रातिशाख्यम्। ४.५,३.१३ इत्यनेन अनुनासिकस्याधिकारः चतुर्थाध्यायस्य नवम सूत्र प्राक पर्यन्तम्(३) ऋक्तन्त्रम्। ५.१८५एवं द्रष्टव्यः note-१८५ (४) ऋग्वेदप्रातिशाख्यम्। १.६३, २.६७

[६०] (१) रक्तसंज्ञोऽनुनासिकः। ऋग्वेदप्रातिशाख्यम् १.३६। (२) आ रक्तः। ऋक्तन्त्रम् ३.६.११४। (पृ. २५)

[६१] अनुस्वारोविसर्गश्च ×क ×पौ चापि पराश्रितौ॥ पाणिनीय शिक्षा ५।

[६२] अं इत्यनुस्वारः। दूर्गटीका।(कातन्त्र व्याकरणम् १.१.१९)।

[६३] तेषामेवोष्मणाम् अनत्याःसप्त ऊष्माणः (अघोषाः=) अघोषसंज्ञा; वेदितव्याः।यथा-श ष स अः ×क ×प अं इति।....ऋग्वेदप्रातिशाख्यम् १.११.। (पृ. ५४)

[६४] (१) यमानुस्वारनासिक्यानां नासिके।वा.प्राति१.७४। (२) नासिक्य यमानुस्वारान्। ऋ.प्राति १.४८।

[६५] १ अनुस्वारोत्तमा अनुनासिकाः। तैत्तिरीयप्रातिशाख्यम् २.३०।

[६६] १ नासिका विवरादनुनासिक्यः। तैत्तिरीयप्रातिशाख्यम् २.५३।

२ अनुस्वारे हन्वोरूपसंहारे। तैत्तिरीयप्रातिशाख्यम् २.१९।

आचार्यैरनुस्वारस्याङ्गत्वमपि प्रातिशाख्येषूपदिष्टम्। ऋग्वेदप्रातिशाख्य तैत्तिरीयप्रातिशाख्ययो-र्मतानुसारेण चानुस्वारः पूर्वस्वरस्याङ्गं[६७] भवति। वैयाकरणा वृत्तिसु **अ**कारोच्चारणार्थाविति बोधयन्ति[६८]। अनेन ज्ञायते यद्वैयाकरणानुस्वारं पूर्वस्वरस्याङ्गं मन्यते।

३.३.४ **अनुस्वारः स्वरो वा व्यञ्जनो वा।**

ऋक्तन्त्रे **अंश्च आंश्च** द्वयोरनुस्वारसंज्ञा कृतास्ति। अनेन ज्ञायते यदृक्तन्त्रेऽनुस्वारस्य ह्रस्वदीर्घौ द्वौ भेदौ स्वीकृतौ स्तः। तैत्तिरीयप्रातिशाख्यानुसारमनुस्वार एकमात्रिकोऽस्ति[६९]। कृष्णयजुर्वेदस्य पारिशिक्षानुसारन्तु यजूष्यनुस्वारोऽर्ध **ग**कारयुक्तो भवति[७०]। ऋग्वेदवाजसनेयिप्रातिशाख्ययो-र्ह्रस्वपूर्वस्यानुस्वारस्य च दीर्घपूर्वस्यानुस्वारस्य च उच्चारणमात्राया सदृष्टान्तं विवरणं कृतमस्ति[७१]। शुक्लयजुर्वेदे यदा स्वरसहितमुच्चारणं भवति तदा **श ष स ह** इति चतुर्षु वर्णेषु परेषु पूर्वतनस्यानुस्वारस्योच्चारणं गूँ इति भवति। तत्रापि यदि ह्रस्वस्वरात्परेऽनुस्वारः स्यात्तदा दीर्घ गूँ उच्चार्यते। अपि च तदा दीर्घस्वरात्परेऽनुस्वारो भवेत्तदा तस्योच्चारणं ह्रस्व गुँ इति भवति। तदानीमुच्चारणे ह्रस्वदीर्घानुसारमेकमात्रिकं द्विमात्रिकं चोच्चारणं भवति। ऋग्वेदप्रातिशाख्येऽनुस्वारः स्वरो वा व्यञ्जनो वेति विषयमधिकृत्य विचारणा वर्तते। अनुस्वारः स्वरव्यञ्जनयोर्लक्षणानि धरति[७२]। तथापि अनुस्वार स्वरोऽपि नास्ति व्यञ्जनोऽपि नास्ति। भाष्यकार उवटः शास्त्रप्रमाणैर्प्रतिपादयति यच्छैशिरीयशाखायामनुस्वारः स्वरव्यञ्जनातिरिक्तो वर्णान्तरोऽस्ति[७३]।अष्टाध्याय्याः **मोऽनुस्वारः। (८.३.२३) नश्चापदान्तस्य झलि। (८.३.२४)** इतिसूत्रद्वयेन भाषायां पदस्यान्ते मध्ये वा अनुनासिकव्यञ्जनमनुस्वारे परिणमति।

---

[६७] १ पूर्वस्यानुस्वारविसर्जनीयौ। ऋग्वेदप्रातिशाख्यम् १.२४। विसर्जनीयानुस्वारौ भजेते पूर्वमक्षरम्। ऋग्वेदप्रातिशाख्यम्१०.३४।
२ अनुस्वारस्वरभक्तिश्च। तैत्तिरीय प्रातिशाख्यम् २१.६।

*[६८] १ अकारः इहोच्चारणार्थ। कातन्त्रव्याकरणवृत्ति १.१.१९। **२** अं च अश्च तौ, नुश्च विश्च तौ उच्चारणार्थ इति प्रयोजनान्तराभावात्। मुग्धबोधव्याकरणम् १.१९। (पृ. ३२)। **३ अं** इति विष्णुचक्रम्।अकार उच्चारणार्थः। हरिनामामृतव्याकरणम् १.१.१४। (पृ. १२)। ४ अं अः अनुस्वारविसर्गौ। अकारवुच्चारणार्थौ। सिद्धहेमचन्द्रशब्दानुशासनम् १.१.९। (पृ. २)*

[६९] अनुस्वारश्च। तैत्तिरीयप्रातिशाख्यम् १.३४।

[७०] यजुष्यनुस्वार इहापि यत्र भवेत् तदाद्यर्धगकारयुक्तः।पारि.शिक्षा१५६। (कौण्डिन्नायनशिक्षायामनुबन्धेषु)। (पृ. ८३७)

[७१] १ १३.२२तः२८.ऋग्वेदप्रातिशाख्यम्। २ वाजसनेयिप्रातिशाख्यम् ४.१५०, ४.१५१। ३ याज्ञवल्क्य शिक्षा ४२,४३,४४,४५.। ४ पाणिनीयशिक्षा २३,२४.।

[७२] अं वर्णसमाम्नाये पठ्यते। स कांश्चित्स्वरधर्मान्गृह्णाति कांश्चिद् व्यञ्जनधर्मान् –तद्यथाह्रस्वत्वं दीर्घत्वं प्लुतत्वमितिस्वरधर्माः। तथा अर्धमात्राकालता स्वरवशेनोदात्तानुदात्तस्वरितत्वं संयोगश्चेति व्यञ्जनधर्माः। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.५)।

[७३] ----तस्मात्स्वरव्यञ्जनातिरिक्तमन्यद्वर्णान्तरमेतदित्येत्ख्यापनपरमेवैतत्सूत्रमिति सिद्धान्तितम्। उवटभाष्यम्। (ऋग्वेदप्रातिशाख्यम् १.५)।

३.३.५ वोपदेवस्य मुग्धबोधव्याकरणे अनुस्वारार्थे **नु** इति लघ्वी संज्ञा प्रयुक्तास्ति[७४]। हरिनामामृतव्याकरणे **विष्णुचक्रम्** इति संज्ञा प्रयुक्तास्ति[७५]। लिप्यां बिन्दोराकृत्या तस्य निदर्शनं भवति[७६]।

३.३.६ अनुस्वारस्य स्वरूपवैषयिकैः शास्त्रीयप्रमाणैरिदं वैशिष्ट्यम्प्रतीयते यद्वेदानां विविधासु शाखासु लोके चानुस्वारस्य स्वरूपं विभिन्नतया वर्ण्यते। तद्यथा –

1 एषः पराश्रितो ध्वनिः।

2 लोके एष व्यञ्जनात्मकः तेन कारणेनार्धमात्रिकः[७७]।

3 ऋग्वेदेऽनुस्वारः स्वरव्यञ्जनातिरिक्तवर्णान्तरः च शुद्धनासिक्यध्वनिः[७८]।

4 याजुषे व्यञ्जनात्मकः गकारयुक्तानुनासिकध्वनिः।

5 पूर्वस्वरस्याङ्गमस्ति।

अकारादिभिर्युक्तः सन् श्रुतिविशेषात्मलाभवहनादनुस्वारोऽयोगवाहः कीर्त्यते।

३.४ विसर्जनीयः।

३.४.१ **अः** इति विसर्जनीयस्य पाणिनीयापाणिनीयव्याकरणेषु प्रातिशाख्यग्रन्थेषु शिक्षाग्रन्थेषु च निर्देशः कृतो वर्तते। **विसर्जनीय** इति पदं **वि** उपसर्गपूर्वकः **सृज्** धातो **अनीयर्** प्रत्ययस्य संयोजनेन निष्पद्यते। वायोर्विसर्जनेन जन्यत्वातद्विसर्जनीय[७९] इति निर्वचनं तस्योच्चारणस्वरूपं निर्दिशति। एतस्योच्चारणे वायुर्झटिति फुफ्फुसाद्बहिर्निःसरति। वायोर्निःसरणकाले उत्पन्नोध्वनिर्विसर्जनीयो नाम्नाख्यायते।

---

[७४] अंअः नुवी।मुग्धबोधव्याकरणम्१.१९। (पृ. ३२)

[७५] अं इति विष्णुचक्रम्। हरिनामामृतव्याकरणम् १.१४। (पृ. १२)

[७६] (१) अकार इहोच्चारणार्थ इति बिन्दुमात्रो वर्णोऽनुस्वारसंज्ञा भवति। कातन्त्रव्याकरणवृत्तिः १.१.१९। (पृ. ३)

(२) बिन्दुस्वरूपो वर्णो विष्णुचक्रनामा अनुस्वारो बिन्दु लवः च। हरिनामामृतव्याकरणम्१.१४। (पृ. १२)

[७७] अनुस्वारो व्यञ्जनत्वात् लोके तस्यार्धमात्रकः। वेदेषु स द्विमात्रो वा मात्रिको वाऽन्यथाऽपि वा॥ कौण्डिन्नायन शिक्षा ४३।

[७८] ऋग्वेदप्रातिशाख्य में अनुस्वार का स्वरूप। शारदीपीठप्रदीप,वार्षिक शोध पत्रिका। २०१४-१५ (पृ. १६५-१७४)

[७९] वैदिकाभरण। तैत्तिरीयप्रातिशाख्यम् १.१८।

३.४.२ विसर्जनीयस्योच्चारणं **ह** श्रुतिरहितं कार्यमिति याज्ञवल्क्यशिक्षाकारो उपदिशति[८०]। विसर्जनीयस्योच्चारणस्थानः कण्ठः[८१] वा पूर्वस्वरस्थानसदृशश्च भवति[८२]। विसर्जनीयस्य बाह्यप्रयत्ना विवारश्वासाघोषाश्च भवन्ति[८३]। आभ्यन्तरप्रयत्नश्च विवृत्तोऽस्ति[८४]।

३.४.३ विसर्जनीय कृते केषुचितद्व्याकरणेषु शिक्षाग्रन्थेषु च विसर्गो विसृष्टोऽभिनिष्टानोऽभिनिस्तानो वि विष्णुसर्गश्च इत्यादयः संज्ञाः प्रयुक्ताः[८५]। वैयाकरणा द्वे बिन्दू वा कुमारीस्तनयुगाकृतिवत्[८६] विसर्जनीयस्य लिपिचिह्नत्वेन दर्शयन्ति। लिप्यां द्वे बिन्दू वर्णात्पश्चादधोपरि वर्तेते। तेन कारणेन कुमारीस्तनयुगाकृति शब्देन लिपिचिह्नस्य निदर्शनं न युज्यते। कुमारीस्तनयुगाकृतिरिति शब्दो याज्ञवल्क्यशिक्षायां तु विसर्जनीयसहितस्य स्वरितस्य हस्तचालनाकृतिं निर्दिशति[८७]। याज्ञवल्क्यशिक्षायां तस्य वर्णः श्वेतो जातिश्च शूद्रः लिङ्गश्च पुमानित्युपदिष्टम्[८८]।

३.४.४ विसर्जनीयो द्विधा अस्ति। रिफितविसर्जनीयश्चारिफितविसर्जनीयश्च। विसर्जनीयसन्धिविषये पदान्तस्य रेफस्य सकारस्य च विसर्जनीयादेशोऽष्टाध्याय्यां पाणिनिमुनिरुपदिशति[८९]।

विसर्जनीयस्याष्टधागतयः शिक्षाकारा निरूपयन्ति। तद्यथा-(१) ओ भावः (२) विवृत्तिः (३) श (४) ष (५) स (६) जिह्वामूलीय ᳵक (७) उपध्मानीयᳶप (८) रेफः। इत्थं वक्तुं पार्यते यदष्टप्रकारका

---

[८०] *यथा बालस्य सर्पस्य निश्वासो लघुचेतसः। एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता॥ याज्ञवल्क्यशिक्षा ७४।*

[८१] *(१) कण्ठस्थानौ हकारविसर्जनीयौ। तैत्तिरीयप्रातिशाख्यम् २.४६। (२) अकुहविसर्जनीयानां कण्ठः। सिद्धान्तकौमुदी १.१.९। (३) अहविसर्जनीयाः कण्ठे। वाजसनेयिप्रातिशाख्यम् १.७१। (४) चारायणीयशिक्षा ३६।*

[८२] *पूर्वान्तिसस्थानो विसर्जनीयः। तैत्तिरीयप्रातिशाख्यम्२.४८।*

[८३] *खयां यमाःखयः ᳵकᳶपौ विसर्गःशर एव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। वैयाकरणसिद्धान्तकौमुदी ८.२.१। एवं ऋग्वेदप्रातिशाख्यम् १.११।*

[८४] *यमानां संवृत्तं प्राहुःविवृत्तं च स्वरोष्मणाम्। चारायणीयशिक्षा १.१२।*

[८५] *(१) विसर्गसंज्ञा–अं अःअनुस्वारविसर्गौ। सिद्धहेमशब्दानुशासनम् १.१.९। विसर्ग चापि कण्ठजः। शौनकशिक्षा १४। व्यासशिक्षा ४०६। २ वि। मुग्धबोधव्याकरणम् १.१९। ३ विसृष्टः। अकुहविसृष्टाः कण्ठ्या। चारायणीयशिक्षा ३६। (कौण्न्नायनशिक्षायामनुबन्धेषु)। (पृ. ८०४) ४ विष्णुसर्गः। हरिनामामृतव्याकरणम् १.१६। (पृ. १२) ५ अभिनिष्टानो विसर्जनीयः। अभिनिस्तानो विसर्जनीयः। काशिकावृत्तिः ८.३.८६।*

[८६] *(१) मुग्धबोधव्याकरणम् १.१९ (२) कातन्त्रव्याकरणम् १.१.१६।*

[८७] *श्रृङ्गवद्बालवत्सस्य कुमारीकुचयुग्मवत् ।उभक्षेप स्वरो यत्र सविसर्ग उदाहृतः॥ याज्ञवल्क्यशिक्षा६९।(पृ.६३)*

[८८] *----विसर्जनीयःश्वेतः। (पृ. ८१) उष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिता॥ २॥ (पृ. ८३) स्वराविसर्जनीयाश्च यमाः पुल्लिङ्गकाः स्मृताः॥ ६। (पृ. ८५)। वर्णप्रकरणम्। याज्ञवल्क्यशिक्षा।*

[८९] *ससजुषो रुः। ८.२.६६ खरवसानयोःविसर्जनीयः। अष्टाध्यायी ८.३.१५।*

विसर्जनीयसन्धयश्शास्त्रेषु सन्ति[९०]। प्रातिशाख्येष्वष्टातिरिक्तानां सन्धीनामपि सोदाहरणं निदर्शनं वर्तन्ते[९१]। ऋग्वेदप्रातिशाख्ये रिफितविसर्जनीयसन्धीनामरिफितविसर्जनीय-सन्धीनाञ्च विवरणं वर्तन्ते। तत्रारिफितविसर्जनीयसन्धेर्नवप्रकारास्सन्ति। तद्यथा –(१) नियत (४.२४) (२) प्रश्रित (४.२५) (३) रेफ (४.२७) (४) अकाम (४.२८) (५) नियत (४.२९) (६) व्यापन्न (४.३१) (७) विक्रान्त (४.३२) (८) अन्वक्षरवक्र (४.३६) (९) उपाचरित (४.४१)

३.४.५ विसर्जनीयस्य मात्राविषये प्रातिशाख्येषु शिक्षाग्रन्थेषु वा कमपि विधानं न प्राप्यते। तैत्तिरीय प्रातिशाख्यकारः **वर्णस्य विकारलोपौ। (१.५६)** इति सूत्रे वर्णलक्षणं प्रस्तौति। विसर्जनीयस्यापि विकारलोपौ भवतः। तेन तैत्तिरीयप्रातिशाख्ये विसर्जनीयः लक्षणया व्यञ्जनरूपो वर्णो भवितुं पार्यते किन्तु **न विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्यानाम्। (१.१८)** इत्यनेन सूत्रेण ज्ञायते यत्तस्यावबोधो वर्णवन्नभवति। अयोगवाहसंज्ञयाऽप्याख्या नास्ति। वाजसनेयिप्रातिशाख्ये विसर्जनीयः स्वरव्यञ्जनेषु परिगणितो नास्ति[९२]। तत्र विसर्जनीयोऽयोगवाहोऽस्ति। वैयाकरणपरम्परायां केचनाचार्या विसर्जनीयस्य गणनामूष्मवर्णेषु कुर्वन्ति[९३]। यत्तु वाजसनेयितैत्तिरीयप्रातिशाख्ययोर्सिद्धान्तकौमुद्यां च केवलं **शषसहा** ऊष्माक्षरे परिगणितास्सन्ति। एषु ग्रन्थेषु विसर्जनीयस्य कृते कुत्राप्यूष्मनिति संज्ञा प्रयुक्ता नास्ति[९४]। ऋग्वेदप्रातिशाख्ये विसर्जनीयसन्धेर्निरूपणं व्यञ्जनसन्धिमध्ये वर्तते। तेन कारणेन स्वरूपेण व्यञ्जनम्प्रतीयते।

---

[९०] *पाणिनीयशिक्षा (१४)। याज्ञवल्क्यशिक्षा (५०)। शैशिरीयशिक्षा (९९)*

*(१) **ओभावः**– ऋ.प्रा.४.२४ एवं २५।ऋक्तन्त्रम् ३.६.८8। वा.प्रा. ३.४६ एवं ४.४४।*

*(२) **विवृत्तिः**– ऋ.प्रा. ४.२८। तै.प्रा. ८.१६। वा.प्रा. ३.१३।*

*(३) **श**– अष्टाध्यायी ८.३.३६।*

*(४) **ष**–अष्टाध्यायी ८.३.३९,४१,४३,४४,४५। ऋ.प्रा ४.४१। तै.प्रा.८.२३। वाजसनेयिप्रातिशाख्यम् ३.५६,५७,५८।*

*(५) **स** –अष्टाध्यायी ८.३.३४,४२,४३,४७। ऋक्तन्त्रम् ३.७.५.एवं ३.७.६। ऋ.प्रा.४.४१। वा.प्रा ३.३३।*

*(६) ᳵक जिह्वामूलीय एवं **(७)** ᳶप उपध्मानीय –अष्टाध्यायी ८.३.३७। ऋ.प्रा ४.३५ एवं ३६। तै.प्रा. ९.२। वा.प्रा.३.११ एवं १२। ऋक्तन्त्रम् ४.४.७ (१७७)। **(८)** रेफः- अष्टाध्यायी ८.२.६६। ऋ.प्रा ४.२७। तै.प्रा. ८.९८। वा.प्रा.३.४१।*

[९१] *विसर्जनीयस्य **आ** कारः -ऋ.प्रा.४.२४। विसर्जनीयस्य **य** कारः-तै.प्रा.९.१०। ऋक्तन्त्रम् ३.६.७।*

[९२] *१. नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः। वाजसनेयिप्रातिशाख्यम् १.४१।२. त्रयोविशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः। द्विचत्वारिंशद्व्यञ्जनान्येतावान्वर्णसंग्रहः। वाजसनेयिप्रातिशाख्यम् ८.३८।*

[९३] *(१) हशषसअः ᳵकᳶप अं। उवटभाष्यम्। ऋग्वेदप्रातिशाख्यम् १.१०। (२) ऊष्मा सस्थानम्। ऋक्तन्त्रम् ४.४.७ (१७७)। (पृष्टः52) (३) अंअः ᳵकᳶपशषसाःशिट्। सिद्धहेमशब्दानुशासनम् १.१.१६। (४) गतिरष्टविधोष्मणः। याज्ञवल्क्यशिक्षा५०। (५) गतिरष्टविधोष्मणः।पाणिनीयशिक्षा१४।*

[९४] *(१) परे षडूष्माणः। तैत्तिरीयप्रातिशाख्यम् १.९। (२) शषसहा उष्माणः। सिद्धान्तकौमुदी ८.२.१। (३) अथोष्माणः। ८.१६ शिति षिति सिति हिति। ८.१७ वाजसनेयिप्रातिशाख्यम्।*

किन्तु ऋग्वेदप्रातिशाख्यानुसारम्विसर्जनीयः पूर्वस्वरस्याङ्गं भवति[९५]। तेन कारणेन तस्य स्वरूपः व्यञ्जरूपोऽपि नास्ति। ऋग्वेदप्रातिशाख्ये विसर्जनीयस्यायोगवाहसंज्ञया उपदेशो नास्ति। ऋग्वेदप्रातिशाक्यवत् वैयाकरणसिद्धान्तकौमुद्यामपि विसर्जनीयसन्धेर्निरूपणं हलसन्धिमध्ये वर्तते। तेन कारणेन विसर्जनीयो व्यञ्जनरूपः प्रतीयते। किन्तु अष्टाध्याय्यां वर्णसमाम्नाये विसर्जनीयोपदिष्टो नास्ति। महाभाष्यकारः तमयोगवाह इति संज्ञया उपदिशति। सर्वेषु ग्रन्थेषु **अः विसर्जनीयः** इति सर्वसामान्यनिर्देशत्वात्कौण्डिन्नायनशिक्षाकारो विसर्जनीयस्य **अयोगवाहत्वं** इत्थं प्रतिपादयति **अयोगेन वहतः स्वरूपं निर्वहतः** इत्ययोगवाह इति व्यवहारः।

मोनीयर विलियम्समहाभागः विसर्जनीयस्य प्रधानानि लक्षणानि निरूपयति यत्तस्य विकारलोपौ भवतः। बहूधा पदस्यान्ते वाक्यस्यान्ते च श्रूयते दृश्यते च [९६]।

३.५ जिह्वामूलीयोपध्मानीयौ।

३.५.१ प्रातिशाख्येषु शिक्षाग्रन्थेषु पाणिनीयापाणिनीयव्याकरणेषु च जिह्वामूलीयोपध्मानीययोः स्वरूपविषये निरूपणं वर्तते। ᳵक इति जिह्वामूलीयः ᳶप इतिउपध्मानीयः च। जिह्वामूल शब्दात् **छ** प्रत्ययस्य संयोजनेन जिह्वामूलीयः शब्दो निष्पाद्यते[९७]। जिह्वाया मूलादुच्चरितो ध्वनिर्जिह्वामूलीयो उच्यते। भट्टोजि दीक्षितो लघुशब्देन्दुशेखर उपध्मानीय शब्दस्यान्वर्थक्यमित्थं बोधयति।- "उश् च पश् च ध्मायेते अनेन इति उपध्मा, तत्र भव इत्यर्थे छ प्रत्ययःतस्य ईयादेशे कृते, उपध्मानीयशब्दः सिद्ध्यति। उपध्मानीयस्यौष्ठत्वम्। इत्थं जिह्वामूलीय उपध्मानीयः च अन्वर्थसंज्ञौ स्तः।

३.५.२ विसर्जनीयस्य विकारो जिह्वामूलीयोपध्मानीयरूपेण परिणमति। अष्टाध्याय्यां कुप्वोᳵकᳶपौ च। (८.३.३७) सूत्रेण कपवर्गयोः परतो विसर्जनीयस्य यथासंख्यं (ᳵकᳶपा) विकल्पेन जिह्वामूलीयोपध्मानीयादेशौ भवतः। वाजसनेयिप्रातिशाख्यकारोऽपि **प्रकृत्या कखयोः पफयोश्च। (३.११)** एवञ्च **जिह्वामूलीयोपध्मानीयौ शाकटायनः। (३.१२)** इति द्वाभ्यां सूत्राभ्यां (ᳵकᳶपयोः) जिह्वामूलीयोपध्मानीययोर्वैकल्पिकं विधानं करोति। अत्र सूत्रकारः **एतौ जिह्वामूलीयोपध्मानीयौ काण्वादिविषयौ। (३.१३)** इति सूत्रेणोपदिशति यदेतौ ध्वनी काण्वशाखायामुच्चरितौ स्तः माध्यन्दिन्यां न स्तः[९८]। तैत्तिरीयप्रातिशाख्ये भाष्यकार ऊष्माक्षरेषु जिह्वामूलीयोपध्मानीयान्परिगणयति[९९]। किन्तु विधिसूत्रे

---

[९५] *पूर्वानुस्वारविसर्जनीयो। ऋग्वेदप्रातिशाख्यम् १.२४।*

[९६] *Monier Williams Page 1001.: Vi-sarjanīya –A Sanskrit English Dictionary*

[९७] *जिह्वामूलाङ्गुलेच्छः। अष्टाध्यायी ४.३.६२।*

[९८] *ᳵक इति जिह्वामूलीयः। ᳶप इत्युपध्मानीयः। एते वर्णाः माध्यन्दिनानां न सन्तीति भावः।....माध्यन्दिनानामितिग्रहणात् काण्वादेर्ननिषेधः। अनन्तभट्टभाष्यम्। (वाजसनेयिप्रातिशाख्यम् ८.३९)। (पृ. ३९४)*

[९९] *अन्तःस्थेभ्यः परे ये वर्णाः षट् ते ऊष्मसंज्ञा भवन्ति। यथा ᳵकशषसᳶप ह इति।पदक्रमसदनभाष्यम्।(तैत्तिरीयप्रातिशाख्यम् १.९)।*

जिह्वामूलीयोपध्मानीययोः कृते सस्थानमूष्म इति शब्दं प्रयुनक्ति। **अघोषस्तस्य सस्थाममूष्माणम्। (९.२)** इत्यनेन सूत्रेण सस्थानमूष्मणः प्रवृत्तिमुपदिशति। अस्मिन्शास्त्रेऽपि तयोर्वैभाषिकप्रवृत्तिमुपदिशति[१००]। तद्यथा **यः कामयेत्। >य≍कामयेत्। (सं.२.१.२) अग्निः पशुरासीत्। >अग्नि≍पशुरासीत्। (सं.५.७.२६)** ऋग्वेदप्रातिशाख्ये सूत्रकारः **अघोषे रेफ्यरेफी चोष्माणं स्पर्शो उत्तरे तत्स्थानमनूष्म परे।** (४.३१) एवञ्च **प्रथमोत्तमवर्गीये स्पर्शे वा। (४.३३)**इति सूत्रद्वयेन विसर्जनीयस्य वैकल्पिकं परस्थानमूष्मापत्तेर्विधानं करोति[१०१]। वस्तुतस्तु विसर्जनीयस्य जिह्वामूलीयोपध्मानीयविकारावेव व्यापन्नसन्धिश्च विक्रान्तसन्धिश्च इति संज्ञाभ्यामुपदिष्टौ स्तः ऋग्वेदप्रातिशाख्ये[१०२]। ऋक्तन्त्रे च जिह्वामूलीयोपध्मानीययोरुपदेशो वर्तते। तयोरयोगवाहत्वेन निर्देशः कृतमस्ति। श्रीसूर्यकान्तमहाभागोऽत्र **ष्प** इति **ष्क** इति द्वौ पाठान्तरौ उद्धरति[१०३]। श्रीसूर्यकान्तमहाभागानुसारमेतौ जिह्वामूलीयोपध्मानीयौ विभिन्नलक्षणवन्तौ उष्मव्यञ्जनौ स्तः। यौ सहस्रवर्षेभ्यो लुप्तौ स्तः। काश्मीरीमातृकासु (शारदालिप्यां) जिह्वामूलीयोपध्मानीययोर्बोधनाय लिपिचिह्नः प्रयुक्तो दृश्यते[१०४]।

३.५.३ उच्चारणप्रकारः।

जिह्वामूलीयोपध्मानीयश्चेत्यन्वर्थसंज्ञे स्तः। संज्ञैव एतयोर्ध्वन्योरुच्चारणस्वरूपं सूचयति। भट्टोजिदीक्षितः कौमुद्यां वर्णानां स्थानप्रयत्नानि वर्णयन् जिह्वामूलीयोपध्मानीययोरुच्चारण-स्वरूपमित्थं बोधयति। ≍क≍प इति कपाभ्यां प्रागर्धविसर्गसदृशौ मन्यते[१०५]। प्रातिशाख्येऽपि विधिसूत्रे सस्थानमूष्म[१०६] एवं परस्थानमूष्म[१०७] इति पदेन विसर्जनीयस्योच्चारणवैशिष्ट्यमेव सूच्यते। वस्तुतस्तु ≍क जिह्वामूलीये क कारः च ≍प उपध्मानीये च प कारो उच्चारणार्थे स्तः[१०८]। शास्त्राध्ययनेन ह्वामूलीयोपध्मानीययोरेततद्वैशिष्ट्यं

---

[१००] *कपवर्गपरश्चाग्निवैश्यवाल्मीकयोः। तैत्तिरीयप्रातिशाख्यम् ९.४। न प्लाक्षिप्लाक्षायणयोः। तैत्तिरीयप्रातिशाख्यम् ९.६।*

[१०१] *अघोषे स्पर्शेउत्तरे रेफ्यरेफी च विसर्जनीय उष्माणमापद्यते। (तत्स्थानम् =) तस्याघोषस्य परत्रावस्थितस्य समानस्थानम्; अनूष्मपरे स्पर्शे। उवटभाष्यम्।(ऋग्वेदप्रातिशाख्यम् ४.३१)।*

[१०२] *व्यापन्न ऊष्मसन्धिः स विक्रान्तः प्राकृतोपधः। ४.३५ ऋग्वेदप्रातिशाख्यम्।*

[१०३] *पादटीप -१२ ष्क इतिA.B.D:क इति C, पादटीप –१३ ष्प इति A.B.D:प इति C ऋक्तन्त्रम्। (पृ.२)*

[१०४] *Dr. Surya Kant 3:“≍क इति≍प इति।जिह्वामूलीय(formed at the end root of the tongue) and उपध्मानीय(on breathing)the two voiceless breathings, had both separate character in the alphabets of the earlier centuries A.D. but for nearly a thousand years They are obsolete. This may be the reason why our prātiśakhya does not prescribe any rule for these…….They are however, employed in Kāśmīrīśārdāmss. (note-2-12) ऋक्तन्त्रम्।*

[१०५] *पूर्वत्रासिद्धम्। वैयाकरणसिद्धान्तकौमुदी ८.२.१।*

[१०६] *अघोषपरस्तस्य सस्थानमूष्माणम्। तैत्तिरीय प्रातिशाख्यम् ९.२।*

[१०७] *अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे तत्स्थानमनूष्मपरे। ऋग्वेदप्रातिशाख्यम् ४.३१।*

[१०८] *(१) ककार उच्चारणार्थः....। १.१.१७ एवं प इहोच्चारणार्थः। कातन्त्रव्याकरणम् १.१.१८।*

प्रतीयते यत् ≍क ≍प इति विशिष्टध्वनी विसर्जनीयस्योच्चारणवैशिष्ट्यं सूचयतः। एतौ ध्वनी विसर्जनीयसन्धेरेव प्रकारौ वा विसर्जनीयस्य विकारौ वा कथ्येते।

३.५.४ ≍क इति जिह्वामूलीयः ≍प इति उपध्मानीयश्च एतयोर्ध्वन्योर्निदर्शनं लिप्यां वज्राकृतिगजकुम्भाकृतिना क्रियेते[१०९]। एतयोः कृते मून्यौ संज्ञा व्यवहृता मुग्धबोधव्याकरणे[११०]। जिह्वामूलीयोपध्मानीययोर्लिपिविषयेऽपि भिन्नेषु व्याकरणेषु वैविध्यं प्रवर्तते[१११]। अन्यवर्णस्य योगेनैव श्रुतिविशेषात्मलाभवहनाच्चोभे अयोगवाहौ कीर्त्येते। महाभाष्येषु परिगणिता अयोगवाहाः तस्य पूर्ववर्तिनः परवर्तिनः च शास्त्रेष्वित्थं निरूपितास्सन्ति।

॥ सन्दर्भग्रन्थाः ॥

अथर्वप्रातिशाख्यम्॥सूर्यकान्त शास्त्रिणा सम्पादितम्। प्रकाशकः महेरचंद लछमनदास पब्लिकेशन्स। पुनर्मुद्रित संस्करणम्। २००८॥

ऋक्तन्त्रम्॥ (सामप्रातिशाख्यम्) ॥ संशोधितं सम्पादितं डॉ. सूर्यकान्त॥ महेरचंद लछमनदास॥ १९७०।

ऋक्तन्त्र-एक परिशीलन॥लेखकः डॉ. सुरेश प्रकाश पाण्डेयः। परिमल पब्लिकेशन्स। दिल्ली। प्रथम संस्करण। १९९१।

ऋग्वेदप्रातिशाख्यम्॥ उवट भाष्य संवलितम्। डॉ.वीरेन्द्रकुमार वर्मा। काशी हिन्दु विश्वविद्यालय चौखम्बा संस्कृत प्रतिष्ठानम्। पुनर्मद्रित संस्करणम्। १९९९।

ऋग्वेदप्रातिशाख्यम्॥ एक परिशीलन। डॉ. वीरेन्द्रकुमार वर्मा। सम्पादकः– डॉ. सिद्धेश्वर भट्टाचार्य। काशी हिन्दू विश्वविद्यालय शोध-प्रकाशन। १९७२।

ऋग्वेदप्रातिशाख्य में अनुस्वार का स्वरूप। डॉ. कालिन्दी पाठकः। शारदापीठप्रदीप।(वार्षिकशोधपत्रिका)। (२०१४-१५। पृष्टांकः १६५-१८४)।

कातन्त्रव्याकरणम्॥ सम्पादकः आर.एस.सैनी। भारतीय विद्या प्रकाशन (दिल्ली,वाराणसी)। १९८५।

काशिका॥(प्रथमो भागःद्वितीयो भागश्च)। व्याख्याकारः –श्री नारायणमिश्रः। काशी हिन्दू विश्वविद्यालय

---

(२)कपावुच्चारणार्थौ....कपयोर्जिह्वामूलीयोपध्मानीययोः सूत्रे उच्चारणत्तथाभूतावेतादेशौ विधीयते इति कस्यचिद् भ्रान्तिःस्यात्तन्निराकुर्वन्नाह क-पावुच्चारणार्थाविति ताभ्यां विना तदुच्चारणशक्यत्वादिति भावः। सुपद्मव्याकरणम् १.३.५। (पृ. ३३)

[१०९] (१)----वज्राकृतिवर्णो जिह्वामूलीयसंज्ञा भवति। १.१.१७ गजकुम्भाकृतिवर्णो उपध्मानीयसंज्ञा भवति। कातन्त्रव्याकरणवृत्ति १.१.१८। (२)अंअः ≍क≍ पशषसाःशिट्।.......अनुस्वार-विसर्गौ –वज्र-गजकुम्भाऽऽकृती च वर्णौ श-ष-साश्च शिट् स्युः।लघुवृत्तिः। (सिद्धहेमचन्द्रशब्दानुशासनम् १.१.१६)।(पृ. ३)

[११०] ≍कपौ मून्यौ। मुग्धबोधव्याकरणम् १.२०। (पृ. ३२)

[१११] क + प m इति मुग्धबोधव्याकरणस्य सम्पादने एवञ्च ≍क≍ प इति सिद्धहेमशब्दानुशासनस्य सम्पादने लिपिचिह्नौ प्रयुक्तौ स्तः।

चौखम्बा प्रकाशन। वाराणसी। पुनर्मुद्रित संस्करणम्। २००५।
कौण्डिन्न्यायनशिक्षा॥ उपबन्धोऽनुबन्धैश्चोपपबृंहिता महाशिक्षा। प्रणेता–शिवराज आचार्य कौण्डिन्न्यायनः। चौखम्बा विद्याभवन। वाराणसी।पुनर्मुद्रित संस्करण। २००७।
तैत्तिरीयप्रातिशाख्यम्॥ माहिषेयकृत पदक्रमसदन भाष्यसंवलितं रिङ्कण हिन्दी व्याख्योपेतम्। पं.सशीलकुमार पाठकः। सम्पादक – डॉ. जमुना पाठकः। चौखम्बा संस्कृत सीरीझ। वाराणसी। प्रथमं संस्करणम्। २००७।
नारदीयशिक्षा। (राणायनीयशाखीयं सामगानम्)। आग्नेयमारभ्य महानाम्न्यन्तो भागः। सम्पादकः- डॉ. विजयकुमार शर्मा।श्री शारदापीठ विद्यासभा। द्वारका। प्रथमं संस्करणम्। २०६९ विक्रमाब्दः।
पाणिनीय शिक्षा॥ व्याख्याकारः -शिवराज आचार्य कौण्डिन्नायनः। चौखम्बा विद्याभवन। वाराणसी। प्रथमं संस्करणम्। २००७।
मुग्धवोधं व्याकरणम्॥ वोपदेव। १९११।
याज्ञवल्क्यशिक्षा॥ व्याख्याकारः डॉ. नरेश झा। चौखम्बा सुरभारती प्रकाशन। वाराणसी। २००९।
वाजसनेयिप्रातिशाख्यम्॥ सम्पादकः एवं व्याख्याकारः –डॉ. वीरेन्द्रकुमार वर्मा। काशी हिन्दू विश्वविद्यालय। वाराणसी। चौखम्बा संस्कृतप्रतिष्ठान। पुनर्मुद्रितं संस्करणम्। १९८७।
वैदिक व्याकरण। (प्रथमो भागः)। लेखकः – डॉ. रामगोपालः। नेशनल पब्लिशिंग हाउस। दिल्ली। तृतीयं संस्करणम्। २००२।
वैयाकरणसिद्धान्तकौमुदी॥ (कारकान्त प्रथमो भागः)॥ व्याख्याकारः सम्पादकश्च– व्याकरणाचार्यः श्रीबालकृष्णपञ्चोली। प्रकाशकम्। चौखम्बा संस्कृत संस्थानम्। वाराणसी। चतुर्थ संस्करणम्। २०००।
व्याकरणमहाभाष्यम्॥ एफ.कीलहोर्न एत्यनेन संशोधितम्। भाण्डारकर ओरिएन्टल रीसर्च इन्स्टीट्यूट। पूना। चतुर्थं संस्करणम्। १९८५।
व्याकरणमहाभाष्यम्॥(नवाह्निकम्)॥ श्रीमन्नागेशभट्टविरचित भाष्यप्रदीपोद्योतोद् भासितेन श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन समुल्लसितम्) सम्पादकः श्री भार्गवशास्त्रिणा टिप्पणीपाठभेदादिसंयोजनपुरःसरं संशोधितम्। चौखम्बा संस्कृत प्रतिष्ठान। दिल्ली। पुनर्मुद्रितं संस्करणम्। १९८७।
व्याकरणमहाभाष्यम्॥ भाष्यप्रदीपेन भाष्यप्रदीपोद्योतेन शब्दकौस्तुभेन च विराजितःराजलक्ष्मी टीकया

चाऽलङ्कृतः। नवाह्निकरूपःप्रथमो भागः। प्रथमम् खण्डम्। संस्कर्ता–श्री गुरुप्रसादशास्त्री।
सम्पादकः पण्डितनन्दकिशोर शास्त्री। राजस्थान संस्कृत कोलेज
ग्रन्थमालायास्त्रिंशं कुसुमम्। मुद्रकः ज्यौतिषप्रकाश। काशी। १९३८।

श्री सिद्धहेमचन्द्रशब्दानुशासनम्॥ (स्वोपज्ञ लघुवृत्ति विभूषितम्)। सम्पादकः–मुनि जम्बूविजयः।
श्री हेमचन्द्राचार्यजैन ज्ञानमन्दिरम्। पाटण (उ.गु)। १९९४।

सुपद्मव्याकरणम्॥ सम्पादकः आर.एस.सैनी। भारतीय विद्या प्रकाशनम्। दिल्ली। वाराणसी।
प्रथमं संस्करणम्। १९८९।

हरिनामामृतव्याकरणम्॥(सवृत्तिकम्)। जीवगोस्वामि प्रभुपादेन विरचितम्।
सम्पादकः त्रिदण्डिस्वामिना श्री भक्तिविलासतीर्थ गोस्वामिमहाभागः।
चैतन्य रीसर्च इन्स्टीट्यूट। १९७२।

Cardona, George, *Pāṇini: A survey of Research.*1976.
1980 First Indian Reprint, Delhi:Motilal Banarsidass.

Sir Monier Williams,*Sanskrit –English Dictionary.* First Edition Published by
1999 Oxford University Press. 1899
Reprint Motilal Banarasidass, Delhi.

~~~~~~~~~~~
~~~~~~~~~~~